ASTROBHAVA

SACRED HYMN · SANSKRIT (DEVANAGARI) WITH MEANING

# Surya Mandala Stotram

Bhavishyottara Purana, traditional

## THE COMPLETE HYMN · SANSKRIT (DEVANAGARI)

An opening salutation, eleven verses on the Sun's orb, and a closing verse on the reward, as chanted in South India.

VERSE 1

नमोऽस्तु सूर्याय सहस्ररश्मये सहस्रशाखान्वितसम्भवात्मने ।
सहस्रयोगोद्भवभावभागिने सहस्रसङ्ख्यायुगधारिणे नमः ॥

Salutations to Surya of a thousand rays, whose being has come forth in a thousand branches. Salutations to him who shares in the states born of a thousand yogas and who upholds ages beyond counting, a thousand in number.

VERSE 2

यन्मण्डलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपम् ।
दारिद्र्यदुःखक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb which gives light, vast, shining like a jewel, fierce and without beginning, which brings an end to poverty and sorrow: may that most excellent light of Savitr purify me.

VERSE 3

यन्मण्डलं देवगणैः सुपूजितं विप्रैः स्तुतं भावनमुक्तिकोविदम् ।
तं देवदेवं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb well worshipped by the hosts of gods, praised by the learned, the knower of the way to liberation through meditation: I bow to Surya, that God of gods. May that most excellent light of Savitr purify me.

VERSE 4

यन्मण्डलं ज्ञानघनं त्वगम्यं त्रैलोक्यपूज्यं त्रिगुणात्मरूपम् ।
समस्ततेजोमयदिव्यरूपं पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb which is knowledge itself in solid form yet beyond reach, worshipped in the three worlds, whose nature is the three gunas, whose divine form is made of all radiance: may that most excellent light of Savitr purify me.

VERSE 5

यन्मण्डलं गूढमतिप्रबोधं धर्मस्य वृद्धिं कुरुते जनानाम् ।
यत्सर्वपापक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb which awakens the hidden understanding, which makes dharma grow among people, and which brings an end to all sins: may that most excellent light of Savitr purify me.

VERSE 6

यन्मण्डलं व्याधिविनाशदक्षं यदृग्यजुः सामसु सम्प्रगीतम् ।
प्रकाशितं येन च भूर्भुवः स्वः पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb able to destroy illness, which is sung in the Rig, Yajur and Sama Vedas, and by which earth, sky and heaven are lit: may that most excellent light of Savitr purify me.

---

VERSE 7

यन्मण्डलं वेदविदो वदन्ति गायन्ति यच्चारणसिद्धसङ्घाः ।
यद्योगिनो योगजुषां च सङ्घाः पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb of which the knowers of the Veda speak, which the bands of Charanas and Siddhas sing, and which yogis and the companies devoted to yoga praise: may that most excellent light of Savitr purify me.

---

VERSE 8

यन्मण्डलं सर्वजनैश्च पूजितं ज्योतिश्च कुर्यादिह मर्त्यलोके ।
यत्कालकालाद्यमनादिरूपं पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb worshipped by all people, which makes light here in the world of mortals, which is the first of time and of the destroyer of time, and has no beginning: may that most excellent light of Savitr purify me.

---

VERSE 9

यन्मण्डलं विष्णुचतुर्मुखाख्यं यदक्षरं पापहरं जनानाम् ।
यत्कालकल्पक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb called by the names of Vishnu and the four-faced Brahma, which is imperishable and takes away the sins of people, and which brings about the end of time and of the world-ages: may that most excellent light of Savitr purify me.

---

VERSE 10

यन्मण्डलं विश्वसृजं प्रसिद्धमुत्पत्तिरक्षाप्रलयप्रगल्भम् ।
यस्मिन् जगत्संहरतेऽखिलं च पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb renowned as the maker of the universe, mighty in creating, protecting and dissolving it, and into which the whole world is withdrawn: may that most excellent light of Savitr purify me.

---

VERSE 11

यन्मण्डलं सर्वगतस्य विष्णोरात्मा परं धाम विशुद्धतत्त्वम् ।
सूक्ष्मान्तरैर्योगपथानुगम्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb which is the very self of the all-pervading Vishnu, the highest abode, the pure reality, reached along the path of yoga by those of subtle inner sight: may that most excellent light of Savitr purify me.

---

VERSE 12

यन्मण्डलं वेदविदोपगीतं यद्योगिनां योगपथानुगम्यम् ।
तत्सर्ववेद्यं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥

That orb sung by the knowers of the Veda, which yogis reach along the path of yoga: I bow to Surya, the one to be known through everything. May that most excellent light of Savitr purify me.

---

PHALA SHRUTI 1

सूर्यमण्डलसुस्तोत्रं यः पठेत्सततं नरः ।
सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥

The verse says that whoever recites this fine hymn to the orb of the Sun constantly becomes pure of all sins and is honoured in the world of the Sun.

---

CLOSING

इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंवादे सूर्यमण्डलस्तोत्रं सम्पूर्णम् ॥

Thus ends the Surya Mandala Stotram, from the dialogue between Shri Krishna and Arjuna in the Bhavishyottara Purana.

---

## Read it on its page

The Surya Mandala Stotram with its meaning, how and when it is recited, and the same text in five more scripts: astrobhava.com/mantra/surya-mandala-stotram/




PERFORMED FOR YOU

### The Surya Homam, in your name

At our Yagna Ashram, telecast live · astrobhava.com/product/surya-homa/

Book →



AstroBhava · www.astrobhava.com · support@astrobhava.com · +91 96295 55442

An initiative of Vedhon Management Consultants (OPC) Pvt Ltd, Pollachi